Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 5 | ISSN : 2582-0095

# वैष्णवरामदासविरचितगोपालदासचरितकाव्ये धार्मिकतत्त्वालोचनम्

**पातकोटिसुब्बाराव**
शोधच्छात्र:, साहित्यविभाग: राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 4 Issue 5
Page Number: 55-58

**Publication Issue :**
September-October-2021

**Article History**
Accepted : 01 Sep 2021
Published : 30 Sep 2021

**सारांश**:- कवे: कर्म काव्यम्', अर्थात् कवे: सारस्वतसृष्टि: काव्यम् भवति। कवि: स्वीयनैसर्गिकप्रतिभया यत्किमपि पश्यति तत्सर्वं दृष्ट्वा अनुभवञ्च कृत्वा सामाजिकं सांस्कृतिकं धार्मिकं सत्साहिव्यं संरचयितुं सततं प्रयत्नशीलो भवति। पुनश्च धार्मिकभावानां धार्मिकविचाराणां च अभिव्यक्तये साहित्यं समाजस्य दर्पणोऽस्ति इत्युच्यते। तत्साहित्येषु च वैष्णवरामदासेन विरचितं गोपालदासचरितकाव्यमन्यतमं वर्तते। अत्र च समाजहितकारकाणि नैकानि धार्मिकश्लोकानि वर्तन्ते। तदेव मया वैष्णवरामदासविरचितगोपालदासचरितकाव्ये धार्मिकतत्त्वालोचनम् इति शीर्षकमाश्रित्य शोधलेखरूपेण संक्षेपेण प्रस्तूयते।

**मुख्यशब्द**:- कवि:, धार्मिकतत्त्वम्, गोपालदासचरितकाव्यम्, काव्यम्, वैष्णवरामदास:, शब्दब्रह्मण:, ।

सर्वं जगदिदं परब्रह्मणो विवर्तरूपमिति महर्षीणां मतम्। शब्दब्रह्मण उपासनेन परं ब्रह्म अधिगन्तुं शक्यते इति महर्षिवचनम्।

**द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म तथापरम्।**
**शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति।।**[1]

एवं विधस्य शब्दब्रह्मण: उपासनप्रकार: बहुधा वर्तते। शब्दब्रह्मण: आदिस्वरूपम् ॐकार:। ततो वेदा: महर्षिभि: दृष्टा: किन्तु वेदाध्ययने सर्वेषाम् अधिकार: कालान्तरे लुप्त:। तत: मन्दाधिकारिणां हितार्थाय महर्षिभि: पुराणानि रचितानि। अष्टादशसंख्यायुतानि, चतुर्लक्षश्लोकात्मकानि पुराणानि अधिगन्तुं सर्वे शक्ता: न भवन्ति इति ऋषितुल्या: महाकवय: काव्यानि निर्मिमिरे कि बहुना एतद् क्रमम् अनपेक्ष्याऽपि 'श्रीमद्रामायणं 'लौकिकवाङ्मये आदिकाव्यं वेदानन्तरं मुनिना वाल्मीकिना रचितम्। तत: कालिदासादय: प्रसिद्धा: एव। वाङ्मयस्य प्रयोजनेषु उपदेश: मुख्यतम:। वेदकृत: उपदेश: प्रभो: आज्ञा इव लघयितुम् अशक्या, अकरणे च प्रत्यवाय: दृष्ट:। पुराणेषु दृष्ट: उपदेश: सुहृदुपदेश इव मैत्रीपूर्वक:। तदाचरणे श्रोतु: स्वेच्छा भवति। एवं सत्कार्यानुष्ठाने कामचारित्वं माभूदिति काव्यानि कान्तासम्मितानि कविभि: रचितानि। यथा काचन प्रियतमा अनुनयालापै: प्रियम् अभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवदिति उपदिशति अत: वेदपुराणेभ्य: अपि काव्यकृतोपदेश: आदरणीय: इति आलङ्कारिका: स्पष्टम् ऊचु:। तथैव काव्येऽस्मिन्नपि वेदादिविषये धर्मविषये च बहुधा वर्णितम्। तमेवाश्रित्य **वैष्णवरामदासविरचितगोपालदासचरितकाव्ये धार्मिकतत्त्वालोचनम् इति** शीर्षकै: शोधलेख: लिखित:।

[1]. म.भा., शा.प., अ .232, श्लो . 30

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गोपालदास: शास्त्रार्थचर्चायां वैष्णवसम्प्रदायस्य माहात्म्यं प्रति पादयित्वा सर्वान् आनन्दितवान्। तत्रैव योगाश्रमं नाम संस्कृतप्रचाराय महाविद्यालय: अस्ति। येन गंगाया: शोभा अतीव रमणीया वर्तते। तत: समीपे विद्यमान ऋषिकुलं नाम आश्रमं प्राप्य तत्र सर्वान् प्रदेशान् च दृष्ट्वा अध्यापकै: सह वार्ता कृत्वा अग्रे गतवान्। मार्गे नानाविधै: शिल्पकालान् दृष्ट्वा तत्र गुरुकुलं च दृष्ट्वा तत: ऋषिकुलं प्राप्य तत: पूर्वस्थान् अवधुतमण्डलाश्रमे किञ्चित् कालं स्थित्वा यात्राया: अवसरे बद्रीनाथमन्दिरं प्राप्तवान्। तत्र गंगातीरान्तरे एकं स्वर्गाश्रमम् अस्ति। भक्ता: तं आश्रमं द्रष्टम् इच्छति परं नौकानोपलभ्यते। स्वामी गोपालदास वचनानुसारं ते सर्वे भगवत: संकीर्तने लग्ना: यतो हि संकीर्तनया सर्वं साध्यतेइति। तदा सहसा आकाशवाणी उक्तवती नेत्रे उन्मील्य स्वेष्टदेवीं पश्यन्तु इति सर्वे आश्चर्यं प्रकटयन् गोपालदासं अपृच्छन् तदा तेन उक्तं भगवत: कृपया समुद्रं एव तर्त्तुं शक्यते तर्हि नद्या: का गति:। एवं गोपालदास: बद्रीनाथ(बद्रीधामं) प्राप्य भगवत: दर्शनं, वन्दनं, पूजां च अकरोत्।. स्वामी बद्रीनाथस्य दर्शनेन स्वयं महान् पुण्यशाली इति मत्वा तत: गोपालदास: स्व आश्रमं तीर्थयात्रं संपूर्णं कृत्वा प्रत्यागतवान्।

काव्यस्य सप्तमसर्गे सुन्दरस्य बद्रीनाथदाम्न: प्रसङ्गानन्तरं अष्टमसर्गे शास्त्रस्वाध्यायफलनिरुपणं विधीयते। तस्मिन् बद्रिनाथदाम्नि द्वौ पण्डितौ सदाचारशीलयुक्तौ अस्ताताम्। भगवत: शिवस्य अपारकरुणाप्रसादात् तौ द्वौ सकलशास्त्रविशरदौ बभूवतु:। यथा विदुषां वाचं अर्थ: अनुधावतीति प्रशस्ति: घटते तथैव तयो: द्वयो: स्थिति:। तयो: द्वयो: नामानि भक्तराम, कुलयशस्वी च अभवताम्।

आगतवस्तु महत्सु जनेषु कश्चित् सन्देह: उपजायमान: आसीत् यत् कश्चमार्ग: वैदिक: तथा किं फलं सेव्यम् इति प्रश्ने सति तौ द्वौ तदानीम् अकथयताम्। पूर्वजै: य: मार्ग: श्रेयसे समुपदिष्ट: स च मार्ग: अनुसर्तव्य:। वेदाभ्यासं विना जीवनसुखरहितं तथा शास्त्ररहितजन: पशु तुल्य: भवन्ति। वेदा: तथा तदनुसृत्य प्रोक्ता: ग्रन्था: सुखार्थिभि: सेव्य:। सच्चिदानन्दप्राप्तये वेदा: एव शरणीया:। व्यासेनोक्तम् शास्त्रस्य फलं केवलं ब्रह्मप्राप्ति: तथा शास्त्राणाम् अध्ययनं तत्त्वज्ञानं विना वृथा भवति। अत: विद्यया एव अमृत: लभ्यते इति निष्कर्ष: उपजायते। श्रुतौ संसार: अनित्य: ब्रह्मसत्यं प्रोच्यते यतो हि तेनैव कारणेन भगवत: श्री रामस्य प्राप्ति: भवति इति शिव: पार्वतीं प्रति प्रोवाच।

**रमन्ते योगिनो यस्मिन् सच्चिदानन्द रूपिणि।**

**राम: स एव विज्ञेय: सकलो निष्कलस्तथा।।**[2]

यस्मिन् योगिजना: रमन्ते, तादृश: निराकार: सच्चिदानन्दरुप: श्रीरामचन्द्र: यस्य च प्राप्त्यानन्तरं परमशान्ति: लभ्यते। सचराचर संसारस्य कर्ता भर्ता हर्ता च श्री रामचन्द्र: स्वलीलया जगत्सृजति। व्यसदेव: सम्पूर्णजगत् भगवत: लीलास्वरुपमिति अवदत्। असौ राम: जगत: नियमान् दृढीकर्तुं मानुषं वपु: धृतवान्। शास्त्रै: शास्त्रैश्च राक्षसान् दैत्यान् च हतवान्।

अयं च राम: त्यागे रागे च समदर्शित्वं विधाय धर्मस्य पालनं तथा गुरुषु भक्तिं विधाय आदर्श चरित्रानि समबोधयत्। अत: वेद तथा धर्मशास्त्रादीनां स्वाध्यायेन इष्टसिद्धिविधायकं कार्यं सिद्धति एवं प्रकारेण निराकारस्य वेदस्य स्वाध्यायफलं निरुपितं चर्चितं च वर्तते।

---

[2]. श्री गोपाल चरितम् काव्यम्, 8.38

वेदानां अध्ययेन परमपदस्य प्राप्तिर्भवतीति श्रुत्वा कश्चित् जनः अनुरागवसतः पप्रच्छ। यत् केवलं वेदेषु कर्मणः वर्णनं लभ्यते। न तु तत् ब्रह्मप्राप्तये समाधानं ततः मुनिभिः चतुर्णां साधनानां निर्देशः कृतः। तत्तु समादि सम्पत्तयः वैराग्यं मुमुक्षुता विवेकत्वेन कथ्यते। संसारिकभोगस्य परित्यागः वैराग्यम्। तथा विषयेभ्योः निवर्तनं कृत्वा इष्टेषु स्थापनं रामः। गच्छतां इन्द्रियाणां निरोधः दमः। प्राप्तेषु अनुकूलप्रतिकूलवस्तुषु हर्षः शोकः च न कुर्यात्। शीतोष्णादि द्वन्दं सहिष्णिता तितिक्षा। विषयानां प्रति नैराश्यभावं प्रदर्श्य चित्तस्य स्थिरता समाधानम्। गुरुपदिष्टेषु वाक्येषु चेतसः भृति श्रद्धा। प्राप्तेषु विषयेषु मनसः रुचि उपरतिः सम्पूर्णजगदिदं असत्यमिति मत्वा सद्ब्रह्मचिन्तनं विवेकः। यथा हंसः मिश्रिते दुग्धपानिये दुग्धं विभजते तद्वद् विवेकवान् जनः सदसतः पृथकीकर्तुं शक्नोति।

मलविक्षेण आवरणादि दोषैः जीवस्य मनः आवृतं भवति। एतेषां दोषानां परिहारः कर्तव्यः। कर्मोपासना ज्ञानं च एतेषां त्रयानां दोषानां परिहारोपायाः यथा मलिने दर्पणे प्रतिविम्बो न दृश्यते तद्वद् मलिने चेतसि ज्ञानं नोत्पद्यते। इयमपि लोकोक्तिः प्रसिद्धिति यत्– "बुद्धिः कर्मानुसारिणी" अतः कर्मणा मनुष्यः निर्मलं फलं भुक्ते। शास्त्रेषु विविध प्रकारकाणां कर्मणां फलं प्रतिपादतं वर्तते। यथा ब्रह्मचारिणां कृते वेदपाठ, गृहस्थानां कृते यागयज्ञाः कर्तव्यः इति प्रतिपादितम्। ततः परं सत्वगुणस्मर्णानां गनां महत्त्वं प्रतिपादितम्। गोपालनस्य सर्वोत्कृष्टता च समुपवर्णिता वर्तते। दुग्धं तक्रादिकं सात्त्विकत्वात् बुद्धौ अपि सात्त्विकता आयाति। सत्त्वगुणः ज्ञानस्य उत्प्रेरकः। अनेन अवश्यं ज्ञानं प्राप्यते। नरपश्वोः कर्माणि सर्वत्र समानानि। परन्तु विशेषता ज्ञानस्य वर्तते।

श्रागुरुदत्तनाम्ना कश्चित् महात्मा गो रक्षार्थम् उपदेशं शिष्येभ्यो ददौ। त्यागस्य भावना दानस्य माहात्म्यं च प्रतिबोधितम्। ततः परं ज्ञानिनाम् अज्ञानिनां च भेदः प्रदर्शितः।

शास्त्रेषु मनीषिभिः द्विविधा सृष्टिः प्रतिपादिता वर्तते। मानसी सृष्टिः बन्धनस्य कारणं बहिर्भवा तु तस्मात् भिन्ना।

अस्य काव्यस्य महत् तात्पर्यं भवति मनसः भृतिः, बुद्धिमाध्यमेन प्रवर्तीकरणम्। एतदर्थं आसक्तेः परिहारः सुतरां कर्तव्यः। आसक्तिपरिहारपूर्वकम् सदैव धर्मकार्ये मनो निवेशः कर्तव्यः। कविः सु उदाहरणैः वेदस्य ज्ञानकर्मणोः च वर्णनं प्रतिपादयति। शास्त्रानुगुणं प्रतिबोधितश्च। कर्मणः फलं मनः शुध्यति। विक्षेपः नामकः दोषः उपासनायां गच्छति। सदैव इष्टस्य देवस्य ध्यानेन अयं दोषः गच्छति। तृतीयः दोषः आवरणात्मकः वास्तविकज्ञानेन इति। अतः सद्ज्ञानस्य प्राप्तिः सदैव काम्यः। एवं प्रकारेण नवमे सर्गे वदानां ईशप्राप्तिः प्रतिपादिता वर्तते।

प्रागेव वेदानां सर्वव्यापकता प्रतिपादिता वर्तते। ननु मुख्यहेतुत्वरुपेण विषयः उपन्यस्तः। रामस्य सान्निध्यानन्तरं सुखस्य सिद्धेश्च प्राप्तिर्भवति। तापत्रयाणां निवृत्यर्थम् मुख्यफलस्य सिध्यर्थं च कर्मबन्धनात् सुतरां विमुक्तिः अपेक्षते। एतदेव फलं रामस्य प्राप्तिहेतुकं भवति। सर्वैः पुरुषैः धर्मार्थकाममोक्षाख्यः चतुर्विध पुरुषार्थः सेव्यः। एतेषु मोक्षः परमपुरुषार्थः यतो हि अन्ये सर्वे विनाशशीलाः, नष्टाश्च भवन्ति। परन्तु मोक्षः संसारात् निवृत्त्यनन्तरं प्राप्यते। सर्वेषां पदार्थानां सुख–दुःखत्व स्वभावा योगवियोगाभ्यां संसारे दुःखस्य प्रतीतिर्भवति। साधुभिः सह संसर्गात् सुखस्य तथा वियोगात् दुःखस्य प्राप्तिः भवति। जन्मादि षड्विकाराणां स्थितिवशात् संसारं दुःखपूर्णं भवति।

पुष्पितां सृष्टिं दृष्ट्वा मनसि आशा उज्जीविता भवति। ततः तत् प्राप्यते प्रयत्नः क्रियते। कष्टेन लब्धेऽपि परेषाम् ईर्ष्याकारणात् सुखं नानुभूयते। अस्मिन् सन्दर्भे दत्तात्रेयस्य उदाहरणं प्रस्तूय कविः विषयस्य त्यागः सुतरां करणीयः इति बुद्धिमान् नरः सर्वान् विषयान् परित्यज्य ब्रह्मणि रमते। कच्छपः यथा इन्द्रियाणि संयमणं करोति तद्वद् बुद्धिमान् विषयान् त्यजति। अस्मिन् विषये बहुनि उदाहरणानि अस्मिन् कान्ये प्रदत्तानि वर्तन्ते। एवं हि श्रूयते कश्चित् महात्मा मोह कारणात्

मानुषं रुपं त्यक्त्वा शृङ्गयुक्त: बभूव। सम्बन्धि जना: अपि स्वार्थकारणात: आयान्ति। अत: तेऽपि त्याज्या:। रघुकुलस्य राजा अज: वियोग कारणात् महत् दु:ख्यम अवाप्नोत्। संसारस्य भोग: विषवत् भवति। वैदिकमार्गाश्रयनेन जीव: यदा पुरुषार्थपरं प्राप्नोति तदानीं समस्त दु:खात् विमुच्यते।

सनत्कुमार: नारदं प्रति सत्संगमाध्यमेन तापत्रयस्य समूलं नष्टं भवतीति उपादिदेश। यदा कामना: विनष्टा: भवन्ति तदानीं जीव: भगवन्तं प्राप्नोति। इत्थं चूडाल नाम्नि काचित् तत्त्वज्ञा नारी राजानं प्रबोधयामास। मैत्री अपि विषयं विहाय मोक्षपदवीं गता। एकाग्रबुद्धया सांसारिकं बन्धनात् विमुक्तौ भूत्वा जीव: संसारं तरति। मिथ्या परिपूर्णे संसारे वैदिकमार्ग: श्रेष्ठ: तत्र ये प्रवृत्ता: भवन्ति ते एतां मायां तरन्ति।

धारणाद् धारयति इति धर्म उच्यते। एते अस्मान् रक्षन्ति। एनं त्यज्यते चेद् अस्माकं सत्तैव न स्यात्, अत: स्वजीवनधारणाय अस्माभि: सदा धर्म: पालनीय:, तस्य स्वरूपमुपकारकं च अवबोधयितुं कविना गोपालदासजीवनवृतान्तेन इदं काव्यं रचितम्। तदेव काव्यं पर्यालोच्य सारल्येन संक्षेपेण च अहं **वैष्णवरामदासविरचितगोपालदासचरितकाव्ये धार्मिकतत्त्वालोचनम्** इति शीर्षकमाश्रित्य यथामति: शोधलेखं विलिलेख।

**सहायकग्रन्थसूची**

1.अमरकोश: भारतीयविद्याप्रकाशनम्, नई दिल्ली
2.अलङ्कारशास्त्रस्येतिहास: – डॉ. जगदीशचन्द्रमिश्र:, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी, 1986
3.अलङ्कारशास्त्रेतिहास: डाँ.जगदीशचन्द्रमिश्र. चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 1999
4.आधुनिकसंस्कृतकाव्यशास्त्रम् – डॉ आनन्दकुमार श्रीवास्तव:,ईष्टर्न बुक् लिकर्स, दिल्ली
5.पाणिनीशिक्षा – पिङ्गलार्यसङ्कलिता, शिक्षाप्रकाश – पञ्जिका सहिता, कलकाता
6.महाभारतम्, वेदव्यास पुने संस्करणम्,1961
7.मेदोनीकोश: भारतीयविद्याप्रकाशनम्, नई दिल्ली
8.रामायणं वाल्मीकि:, गीताप्रेस गोरखपुर, 1999
9.श्री गोपाल चरितं काव्यं, श्री वैष्णव वेदान्ताचार्य स्वामी रामदास, ऋषिपाणि नभोनेत्र, संख्येऽब्दे वैक्रमे परे।
10.संस्कृतसाहित्यस्य इतिहास: – प्रो.हरेकृष्णशतपथी, किताबमहल, कटक –1998